# श्रीजगन्नाथसंस्कृतेः सार्वभौमत्वम्

**पूर्णचन्द्र–उपाध्यायः**

**पुरीति शङ्खे प्रकटे सुशोभते,**
**समस्तभक्तान्खलु यो निरीक्ष्यते।**
**तमेव देवं हृदि चिन्तये मुदा**
**मनोरथे मे रथि रव राजते।।**

अतिविचित्रेऽस्मिन्जगति आरोहावरोहक्रमेण सवर्था परिवर्तनशीलायामस्यां विश्वसंस्कृतौ सृष्टेराबहमानकालादेव अनवच्छिन्नयता नितरां प्रसरणशीलाऽस्माकं प्राच्यसंस्कृतिः सर्वतन्त्रा स्वतन्त्रा च। अपूर्वा चास्याः सार्वभौमिकता सार्वकालिकता च। यतोहि संस्कृतेरस्याः अध्यात्मवादत्वमेव समग्रविश्वसंस्कृतौ सर्वातिशयत्वं सर्वादृतत्त्वं च निजीकुरुते। तदिदं वैशिष्ट्यमवलम्ब्य एव महर्षिणा मनुना उक्तं मनुस्मृतौ यत् –

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं–स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।।**[1]

तदस्याः सनातनसंस्कृते आधारमूलासु संस्कृतिषु अन्यतमा एव श्रीजगन्नाथसंस्कृतिः। यतोहि श्रीपुरुषोत्तमस्य भगवतः जगन्नाथस्यैतिह्यं न केवलमुत्कलस्य अपि तु समग्रस्य राष्ट्रस्य भारतवर्षस्यैतिह्यं गौरवं सांस्कृतिकं वैशिष्ट्यं च प्रकटीकुर्वत्सार्थकीकरोति स्वभावम्। सनातनधर्मानुसारं पवित्रतमेषु चतुर्धामस्वन्यतमं सर्वातिरेकं क्षेत्रमेव श्रीक्षेत्रं पुरुषोत्तमक्षेत्रमित्यपरनामधेयम्। यत्खलु शङ्खकृत्या एव स्वसत्तामाधत्ते। शङ्खस्तु भारतीयसंस्कृतौ पवित्रतमः, सकलमङ्गलाधायकः, निधिभूतश्चेति परिगण्यते। विश्वस्य प्राचीनतमासु संस्कृतिष्वन्यतमेयं श्रीजगन्नाथसंस्कृतिः प्राग्वैदिककालोपेता एव। संस्कृते अस्या अपूर्वं वैशिष्ट्यमिदं यत्, विश्वस्य सर्वेऽपि धर्माः, सर्वे सम्प्रदायाश्च तदस्याः संस्कृतेः दर्शनं शिरोभिरुद्बहन्ति।

तदत्र श्रीजगन्नाथमहाप्रभोः मूलतत्त्वमवलम्ब्य यद्यपि विविधदार्शनिकानां नैकानि मतानि दरीदृश्यन्ते, तथापि लक्ष्यनिर्धारणे मूलतत्त्वे तु सर्वेषामैकमत्यम्। तत्र केचन जैनाचार्याः जैनसंस्कृतिमेव श्रीजगन्नाथस्य मूलाधारत्वमामनन्ति। ''जिनः'' इति पदादेव ''जैनः'' इत्यस्य पदस्य निष्पत्तिः। यस्यार्थः निर्गन्थः। तात्पर्यमिदं स्पष्टं यत्, निर्वाणप्राप्त्यर्थं

सर्वेषां कामानां निरास इति। तत्र जैनधर्मप्रवर्तकाः गुरवो वा नाथोत्तरपदपूर्वकमभिधानमादधति। तद्यथा – आदिनाथः, पार्श्वनाथः, ऋषभनाथश्चेत्यादयः। तदेवं जगन्नाथस्य नामसंविधाने तत्त्वमिदमनुकृतं स्यादिती केषांचिदभिमतम्। तद्धि जगतः नाम समग्रस्य विश्वस्य नाथः स्वामी प्रभुर्वा ''जगन्नाथः'' इति कृत्वा सोऽयं देवः सार्वभौमत्वं स्वनाम्ना एव सार्थकी करोति। अपि च बौद्धाचार्याः भगवन्तं बुद्धमपि श्रीजगन्नाथस्य स्वरूपमूलत्वेन स्वीकुर्वन्ति। यतोहि भगवतः विष्णो अवतारत्वेनैव बुद्धस्य परिग्रहणं क्रियते सूरिभिः। तदत्र हिन्दुधर्माचार्येणादिगुरुणा शटकाचार्येण कविराजजयदेवेन च भगवत विष्णोः दशावतारेषु भगवतः बुद्धस्य स्वरूपेण एव श्रीजगन्नाथस्यावतरणमिति तथ्यं प्रतिपादयिषितम्।

तत्र श्रीजयदेवविरचितदशावतारस्तोत्रान्तर्गतं पद्यं यथा –

**निन्दसि यज्ञविधेरहह श्रुतिजातं**
**सदयहृदयदर्शितपशुघातम्।**
**केशवधृतबुद्धशरीर जयजगदीश हरे।।**[2] इति।

तत्रेतिहासविदामभिमतं यदिदं, श्रीक्षेत्रं (पुरीति धाम) प्राचीनानां बौद्धाचार्याणां तद्धर्मावलम्बिनां च प्रमुखं स्थानमासीत्। भक्तशिरोमणिः श्रीचैतन्यदेवस्तु 'जगन्नाथः स्वामी नयनपथगामी भवतु मे'' इति स्वरचिते– जगन्नाथाष्टके श्रीजगन्नाथमहाप्रभुं श्रीकृष्णस्यावतारस्वरूपकं मनुते इति तथ्यं स्पष्टं ज्ञायते। तत्र जगजातिसंवर्गाणामादिवासिनां जनानां च पारम्परिकं मतं यत्, पुरुषोत्तमस्य श्रीजगन्नाथस्यादिस्वरूपन्तु नीलमाधवरूपेण आसीत्। सोऽयं नीलमाधवः महानद्याः तटप्रदेशेऽवस्थितस्य नीलपर्वतस्य नीलगिरेर्वा पादप्रदेशान्तर्गतगहनारण्ये ''कण्टिलो'' इत्याधुनिकनाम्नि स्थाने शवरस्वामिना विश्वावसुना पूज्यते स्म। संदर्भेऽस्मिन्काचित्कथाऽपि सुप्रसिद्धा वर्तते।

किञ्च श्रीजगन्नाथस्य नैकानि नामानि दार्शनिकतत्त्वसंवलितत्वेन तत्सार्वभौमत्वं विश्वचैतन्यं च स्वतः ख्यापयन्ति। तदस्यां शृङ्खलायां ''दारुब्रह्म'' इति तन्नाम अतीव गूढार्थकं दार्शनिकतत्त्वसंवलितं च। श्रीजगन्नाथस्य यदभौतिकं शरीरं, तत्तु विशिष्टशरीरसंवलितं किमप्यत्यन्तं विशुद्धं यन्निम्बकाष्ठं, तेन निर्मितं वर्तते। एतेनैव कारणेन जगन्नाथमहाप्रभुः दारुब्रह्मत्वेन व्यपदिश्यते। तदस्य दारुब्रह्मणस्तत्त्वन्तु, साररूपेण वेदेषु

श्रीमद्भगवद्गीतायां च प्राप्यते। तत्र ऋग्वेदे प्रयुक्तस्य दारुशब्दस्य तात्पर्यं यद् दारु तु एवं भूतः पदार्थोऽस्ति, यस्मात् समग्रस्य ब्रह्माण्डस्योत्पत्तिर्जायते। स्वरूपं निरुपयता भगवतां श्रीकृष्णेन स्वयमेवोक्तं यत् –

**अक्षरं ब्रह्मपरमं स्वभावोऽध्यात्ममुच्यते।**
**भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः।।**[3]

श्रीजगन्नाथस्य दारुब्रह्मात्मकस्वरूपे सांख्यदर्शनसंवलितं प्रकृतिपुरुषात्मकं तत्त्वमपि संगच्छते। तदेवं प्रकृतिपुरुषयोः साहचर्यमेव दारुब्रह्मतत्त्वमुद्बोधयति। दारुब्रह्मविषये पौराणिकी काचित् कथाऽपि प्रचलति यत्, द्वापरयुगे श्रीकृष्णावतारत्वेनावतीर्णस्य पुरुषोत्तमस्यान्तिम् यत्पार्थिवं शरीरं, तदेव पश्चिमसमुद्रात् पूर्वसमुद्रस्य तटवर्त्ति श्रीक्षेत्रमधिगतम् दारुरूपेण। तस्मादेव भगवतः श्रीजगन्नाथस्य समुत्पत्तिः दारुमयेन कलेवरस्वरूपकेणेति।

तत्र पुनः ''चका आखि'' ''चकाडोला'' ''चकानयन'' चेति एतन्नामत्रयं तु जगन्नाथ– महाप्रभोः सर्वद्रष्टत्वं ख्यापयति। यतोहि ''चका'' इति पदस्यार्थः चक्रं, तदेवं ''चक्रवदक्षिणी यस्य सः'' इति व्युत्पत्त्या बहवः दार्शनिका अर्थाः संगच्छन्ते। अपि च चक्रमिति पदं पूर्णमण्डलाकारत्वेन गतिशीलत्वेन च परिवर्त्तनशीलस्य ब्रह्माण्डस्य प्रतीकात्मकमस्ति। अपि च ब्रह्माण्डस्वरूपावधारणत्वेन आनन्त्यस्य सर्वव्यापकत्वस्य च प्रतीकम्। एतदतिरिच्य शून्याकृत्या समं स्वरूपकत्वेन निराकारत्वस्यापि प्रतीकभूतं तत्त्वम्। तदेवमत्र निराकारत्वस्य साकारत्वस्य चेति उभयोः संविधानेन सगुणनिर्गुणयोः सहावस्थितित्वं द्योतते इत्यपूर्वत्वम्।

तदेवं जगदीशः, पुरुषोत्तमः, जगन्नाथ, राजाधिराजः, महाबाहुश्चेत्यादिषु तन्नामसु श्रेष्ठत्वं, सर्वाधिष्ठातृत्वं, पराक्रमशालित्वं, सार्वभौमत्वं चेत्यादिकं दार्शनिकार्थतत्त्वजातं द्योतते।

तत्र सकलदर्शनशास्त्रविमृष्टतत्त्वछष्ट्या श्रीजगन्नाथस्य त्रिदेवत्वं त्रिमूर्त्तित्वं वा सर्वथा गूढं तत्त्वं व्यनक्ति। सच्चिदानन्दस्वरूपकस्य परमात्मनः ''सत्+चित्+आनन्दः'' इति यत्समन्वयात्मकं तत्त्वत्रयं, तस्यैव प्रतीकात्मकं स्वरूपं जगन्नाथबलभद्रसुभद्राणामिति तत्त्वदर्शिनामभिमतम्।

इति वैदिकबीजमन्त्रे ''अ+ऊ+म्'' इति वर्णत्रयस्य यत्सम्मिश्रणात्मकं तत्त्वं ब्रह्मा–विष्णु–महेशानां स्वरूपाधायकं तदपि प्रीतिफलति पुरुषोत्तमस्य मूर्त्तिमति रूपत्रये। सन्दर्भेऽस्मिन् विदुषां दर्शनमिदं यत्, ब्रह्मणः प्रतिनिधित्वेन सुभद्रायाः, विष्णोः प्रतिनिधित्वेन जगन्नाथस्य, महेशस्य प्रतिनिधित्वेन बलभद्रस्य च स्वरूपावधारणं कलियुगे इति। अपि च तत्र द्वापरयुगे यौ खलु कृष्णाबलरामौ भ्रातरावास्ताम्, ताविदानीं जगन्नाथबलभद्रौ, तथा च भगिनी सुभद्रा पुनरपि सुभद्रानामधेया इति बहूनामभिमतम्। तदत्र भारतीयसंस्कृतेः या पवित्रमयी परिवारिकी व्यवस्था, सा अपि प्रतिफलतीति श्रीजगन्नाथसंस्कृतेः वैशिष्ट्यमपरम्। एतदतिरिच्यापि श्रीपुरुषोत्तमस्य त्रिमूर्त्तित्वं सत्त्व–रज–स्तमांसीति गुणत्रयस्य, ऋग–यजुः–सामानि इति वेदत्रयाः, शान्तिःमैत्री–प्रगेतिश्चेति राष्ट्रिय–अस्मितायाः, स्वर्ग–मर्त्त्य–पाताल–श्चेति प्रमुखतया लोकत्रयस्य, त्रिगुणात्मिकायाः सृष्टेश्च प्रतीकमूलमिति नैकेषां तत्त्वज्ञानां प्रतिपादनम्। तदनेन ''एकं सद विप्राः बहुधा वदन्ति'' इति वेदान्तवाक्यमपि सार्थकी भवति। श्रीजगन्नाथसंस्कृतेः सार्वभौमत्वे रथयात्रायाः संविधानमतीव महत्त्वपूर्णमेव। तत्र जातिधर्मदेशनिरपेक्षत्वेन निर्विशेषेण वा मानवमात्रस्य भक्तवृन्दस्य दर्शनकौतूकोपशमनार्थमेव सम्पूर्णस्य जगतः नाम विश्वस्य नाथः श्रीजगन्नाथः सर्वविधं बन्धनजातमपास्य रथारुढः सन् राजपथं विचरति। परम्परायामस्यां ''सवर्जनहिताय सर्वजनसुखाय च'' इति भारतीयसंस्कृतेः विशिष्टं तत्त्वं परिलक्ष्यते। अनेन च श्रीजगन्नाथस्य साम्यवादित्वं समदर्शित्वं वा परिलक्ष्यते।

श्रीजगन्नाथसंस्कृतौ नवकलेवरस्य संविधानन्तु श्रीमद्भगवद्गीता–प्रतिपादितं कठोपनिषदि च वर्णितं सांख्यतत्त्वं नाम आत्मतत्त्वं दर्शयति। तत्रात्मतत्त्वस्य नित्यत्वम्, अविनाशित्वम्, सार्वकालिकत्वम्, अजत्वम्, अमरत्वम्, अचेतनस्य जड़शरीरस्य मरणधर्मित्वम्, अनित्यत्वं च स्पष्टं प्रतिबिम्बते तत्त्वजातम्। आत्मनः नवकलेवरः नाम नूतनशरीर धारणमिति यत्तत्त्वमिदं तत्तु श्रीमदभगवद्गीतायाः पद्येऽस्मिन्निम्नलिखिते सुस्पष्टं विवेच्यते। तद्धि –

**वासांसि जीर्णानि यथा बिहाय**
**नवानि गृह्णाति नरोऽपराणि।**

**तथा शरीराणि बिहाय जीर्णा–**
**न्यन्यानि संयाति नवानि देही।।[4]**

भावस्त्वत्र सुस्पष्ट एव यत्, यथा कश्चिन्नरः स्वस्य जीर्णं पुरातनं वस्त्रं सन्त्यज्य पुनः नवीनं वस्त्रं धारयति, तथैव जीवात्मा लक्ष्यसिद्धेः बाधकभूतं स्वस्य जीर्णं शरीरं बिहाय पुनः नवीनं शरीरं धारयति। तदत्र जननमरणगतं वास्तविकं तत्त्वं स्वतः स्पष्टी भवति। श्रीजगन्नाथसंस्कृतौ नवकलेवरपद्धतिस्तु सर्वथा विचित्रा कुतूहलप्रदा च। तत्रात्यन्तं गोपनीयरूपेणैण पुरातनविग्रहेभ्यः नूतनविग्रहेषु ब्रह्मतत्त्वस्य परिवर्त्तनकृत्यं सम्पाद्यते। तदत्र स्वयं परिवर्त्तनकर्ता अपि ज्ञातुमसमर्थो यत्, सः किं कीदृशं च तत्त्वं वस्तु वा परिवर्तयति। अपि च कालान्तरे तस्य स्वर्गगतिः स्वतः जायते। तथ्यमिदं स्पष्टमावेदयति कठोपनिषदि वर्णितं गूढमात्मसम्बन्धितत्त्वम्। तद्धि –

**अणोरणीयान् महतो महीयान्**
**आत्मास्य जन्तोर्निहितो गुहायायम्।**
**तमक्रतुः पश्यति बीतशोको**
**धातुः प्रसादान्महिमानमात्मनः।।[5]**

ब्रह्मपरिवर्तनात्परमेव साक्षात् श्रीमन्दिरपरिसरे निदिष्टे ''कोर्दलिवैकुण्ठ'' इति नामधेये स्थाने पुरुषोत्तमपरित्यक्तं मरशरीरस्य प्रतीकभूतं यत्प्राचीनं दारु तदग्निसंयोजनपूर्वकं संदह्यते। तदेवं नवकलेवरधारणगतं यद् दर्शनं, तत्तु यथा सांख्यतत्त्वगतं दार्शनिकं रहस्यमुदबोधयति, तथैव ''यथा गेहे तथा देवे'' इति प्राच्यसंस्कृतिसंवलितां मानवीयसामाजिकीं परम्परां व्यवस्थां च द्योतयतीति वैशिष्ट्यमिदमपरम्।

तत्र श्रीजगन्नाथसंस्कृतौ भारतीयदर्शनशास्त्राणां यत्पुरुषार्थचतुष्टयान्वितं मानवमात्रस्य यन्मुख्यं साध्यं लक्ष्यभूतं वा ''मोक्ष'' इति तत्त्वं, तदपि लब्धसत्ताकं सारभूतं च तत्त्वम्। कैवल्यापरनामधेयं मोक्षतत्त्वमिदं श्रीजगन्नाथसंस्कृतौ तादात्म्येनैव संधटितं परिलक्ष्यते। श्रीक्षेत्रमिदं मोक्षक्षेत्रमिति नाम्ना अपि व्यपदिश्यते। यतोहि यदि कश्चित् श्रीक्षेत्रे स्वशरीरं त्यजति, तर्हि तस्य मोक्षः नाम निर्वाणं, मुक्तिः कैवल्यं वा जायते इति परम्परानुगामिनां मतिः। तत्त्वमिदमलम्ब्यैव कथेयं प्रचलति यत्, भक्तशिरोमणेः सालवेगस्य यवनस्यापि बडदाण्डे (महति प्राङ्गणे) एव

रथस्य समक्षं देहत्यागपूर्वकं निर्वाणं जातम्। यतोहि मान्यतेयं यत्, 'रथे तु वामनं दृष्ट्वा पुनर्जन्म न विद्यते' इति। अपि च वैष्णवप्रमुखस्य श्रीचैतन्यदेवस्य कैवल्यमपि वृत्तजातं सर्वविदितमेव। श्रीमन्दिरस्य चत्वार एव लब्धसत्ताकः मुक्तिमण्डपोऽपि तत्त्वमिदं मोक्षक्षेत्रत्वं सुदृढीकोरति। श्रीक्षेत्रस्य महोदधितरे स्वर्गद्वारस्य यत्परिकल्पनात्मकं संविधानं, तदपि तत्त्वमिदं परिपोषयति। महाप्रसादरूपेण भगवते श्रीजगन्नाथाय समर्प्यमाणस्यान्नस्यापि ब्रह्मस्वरूपत्वेन कैवल्यसंज्ञानं मोक्षतत्त्वं पुष्णाति।

श्रीजगन्नाथस्य विश्वदेवत्वं, तत्संस्कृतेः सार्वभौमत्वं च सर्वथा महच्छब्दस्य तत्सहावस्थितेः संसिद्धयति। तद्धि श्रीजगन्नाथस्य सम्बोधने ''बड़ठाकुरः'' (महादेवः) इति प्रयुज्यते। श्रीजगन्नाथमहाप्रभोः वेशधारणन्तु बड़श्रृङ्गारः, मन्दिरन्तु बड़देउलः, तत्सेवकश्च बड़पण्डा, तत्प्रसादस्तु महाप्रसादः, तद्राजपथः प्राङ्गणं वा बड़दाण्डः, तन्मन्दिरस्य मुख्यद्वारन्तु सिंहद्वारम्, तत्क्षेत्रावस्थितः समुद्रस्तु ''महोदधिः'' इत्यादिभिः संज्ञकैः व्यपदिश्यते।

तदेवमुपर्युक्तसमीक्षणेन निष्कषोऽयमुपलभ्यते यत्, महाप्रभुः श्रीजगन्नाथः सार्वभौम एव। तत्क्षेत्रं च सार्वभौमिकम्। अपि च तत्संस्कृतिः सार्वभौमिकीति कथनेन नास्ति किमपि विकत्थनम्। इति दिक्।

*संस्कृतविभागाध्यक्षः*
*राजकीयमहाविद्यालयः,*
*भवानीमण्डी (राज.)*

**सन्दर्भाः**

1 मनुस्मृतिः 2 / 20
2 श्रीजयदेवप्रतीतं दशावतारस्तोत्रम् – 8
3 श्रीमद्भगवदगीता – 8 / 3
4 श्रीमद्भगवदगीता – 2 / 22
5 कठोपनिषद् – 1 / 20

———ooo———